पुस्तकम् ।          पेटिका ।

इह ।          च ।          वा ।

इह एकं पुस्तकम् एका पेटिका च स्तः। तत् कृष्णस्य "शब्दमञ्जरी" पुस्तकम् । तस्य पुस्तकस्य मूल्यम् एको रूप्यकः। तस्मिन् पुस्तके द्विशतं पुटानि सन्ति । मम "श्रीरामोदन्त" पुस्तके षष्टिः पुटानि सन्ति ॥

अस्यां पेटिकायां कानि वस्तूनि विद्यन्ते। तस्यां पेटिकायां वस्त्राणि भूषणानि धनानि च विद्यन्ते। इयं हरेः पेटिका। स इमां कुञ्चिकया उद्घाटयति। कुञ्चिका हरेः गोपालस्य वा करे वर्तते ॥

क) प्रश्नाः

| | |
|---|---|
| १। इह के स्तः ? | इह एकं पुस्तकं च एका पेटिका स्तः। |
| २। इदं कस्य पुस्तकम् ? | इदम् कृष्णस्य शब्दमञ्जरी पुस्तकम् ॥ |
| ३। कृष्णस्य पुस्तकस्य किं मूल्यं ? | पुस्तकस्य मूल्यम् एको रूप्यकः ॥ |
| ४। कस्मिन् द्विशतं पुटानि सन्ति ? | तस्मिन् शब्दमञ्जरी पुस्तके द्विशतं पुटानि सन्ति। |
| ५। तव पुस्तके कति पुटानि सन्ति ? | मम पुस्तके षष्टिः पुटानि सन्ति। |

६। इयं कस्य पेटिका ? इयं हरेः पेटिका।

७। कस्तां (कः तां) कया उद्घाटयति ? हरिः तां (पेटकाम्) कुञ्चिकया उद्घाटयति।

८। कुञ्चिका कस्य करे वर्तते ? कुञ्चिका हरेः वा गोपालस्य करे वर्तते।

**ख)** “मम-वयम्” पदाभ्यां यथोचितंवाक्यानि पूरयत।---

१। ____ धनम् आभरणानि च पेटिकायां रक्षामः।

वययं धनम् आभरणानि च पेटिकायां रक्षामः।

२। मालती ____ गृहमागत्य वीणां शिक्षयति।

मालती मम गृहमागत्य वीणां शिक्षयति।

३। ____ गृहं नद्यास्तीरे वर्तते।

मम गृहं नद्यास्तीरे वर्तते।

४। ____ पाठान् यथाकालं पठामः।

वयं पाठान् यथाकालं पठामः।

**ग)** अस् (to be) धातोः ‘लट्’ रूपाणि।

| | | ए | द्वि | ब |
|---|---|---|---|---|
| 3rd person | प्र पु | अस्ति | स्तः | सन्ति |
| 2nd person | म पु | असि | स्थः | स्थ |
| 1st person | उ पु | अस्मि | स्वः | स्मः |

घ) अस् धातोः 'लट्' रूपः वाक्यानि पूरयत। --

१। इह द्वौ अश्वौ ____ ।

इह द्वौ अश्वौ स्तः।

२। वयं चत्वारः भ्रातरः ____ ।

वयं चत्वारः भ्रातरः स्मः।

शब्दसंग्रहः śabdasaṅgrahaḥ = Vocabulary

पेटिका peṭikā = *f* box

इह iha = *in* here

वा vā = *in* or

मूल्यं mūlyaṁ = *n* price

स्तः staḥ = *P.* they two are

रूप्यकः rūpyakaḥ = *m* rupee

शतं śataṁ = *n* hundred

धनं dhanaṁ = *n* wealth

पुटं puṭaṁ = *n* page

वस्तु vastu= *n* thing

विद्यन्ते vidyante = *A.* there are

भूषणं bhūṣaṇaṁ = *n* ornament

उद्घाटयति (उद्घाटयति) udghāṭayati = *P.* opens

वर्तते vartate = *A.* there is

कुञ्चिका kuñcikā = *f* key

यथाकालं yathākālaṁ = *in* time

शिक्षयति śikṣayati = *P.* teaches